## द्वादशः पाठः

# विद्याधनम्

न चौरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥ 1 ॥

**अन्वय** – विद्याधनं न चौरहार्यम् न च राजहार्यम्, न भ्रातृभाज्यं न च भारकारि (अस्ति)। (एतत्) व्यय कृते नित्यम् एव वर्धते। विद्याधनं सर्वधनप्रधानम् (अस्ति)।

**सरलार्थ** – विद्या रूपी धन न चोरों के द्वारा चुराने योग्य है, न राजा द्वारा छीनने योग्य है, न ही भाई द्वारा बाँटने योग्य है और न ही भार (वजन) बढ़ाने वाला है। यह व्यय (खर्च) करने पर नित्य ही बढ़ता है। विद्या रूपी धन सभी धनों में श्रेष्ठ है।

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ॥ 2 ॥

**अन्वय** – विद्या नाम नरस्य अधिकं रूपं, प्रच्छन्नगुप्तं धनम् (अस्ति)। विद्या भोगकारी, यशः सुखकारी, विद्या गुरूणां गुरुः (अस्ति)। विदेशगमने विद्या बन्धुजनः, विद्या परा देवता। राजसु विद्या पूज्यते न हि धनं। विद्या विहीनः पशुः (भवति)।

**सरलार्थ** – विद्या ही मनुष्य का वास्तविक सौन्दर्य है, यह अत्यन्त गुप्त धन है। विद्या भोग का साधन उपलब्ध कराने वाली है, प्रसिद्दि और सुख देने वाली है, विद्या गुरूओं की गुरु है। विदेश जाने पर विद्या मित्र है, विद्या सबसे श्रेष्ठ देवता है। राजाओं में विद्या पूजी जाती है, न कि धन। विद्या के बिना मनुष्य पशु के समान है।

Scanned with CamScanner

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥ 3 ॥

**अन्वय** - पुरुषं केयूराः न विभूषयन्ति, न चन्द्रोज्ज्वला हाराः, न स्नानं, न विलेपनं, न कुसुमं, न (च) अलंकृता मूर्धजाः (विभूषयन्ति)। एका वाणीम् पुरुषं समलंकरोति या संस्कृता धार्यते। अखिलभूषणानि क्षीयन्ते (परं) वाग्भूषणं सततं भूषणम्।

**सरलार्थ** - मनुष्य को न बाजूबन्द, न चन्द्रमा के समान उज्ज्वल हार, न स्नान, न सुगंधित लेप, न फूल और न सजाए हुए बाल सुशोभित करते हैं। एक वाणी पुरुष को अलंकृत करती है, जो संस्कार धारण किए हुए हो, अर्थात् एक संस्कार युक्त वाणी ही मनुष्य को अलंकृत करती है। सभी आभूषण नष्ट हो जाते हैं, परन्तु वाणी रूपी आभूषण शाश्वत है, अर्थात् वाणी रूपी आभूषण कभी नष्ट नहीं होता है।

विद्या नाम नरस्य कीर्तिरतुला भाग्यक्षये चाश्रयः
धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयं च सा ।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणम्
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु॥ 4 ॥

**अन्वय** - विद्या नाम नरस्य अतुला कीर्तिः, भाग्यक्षये च आश्रयः, कामदुघा धेनुः, विरहे च रतिः, सा (नरस्य) तृतीयं नेत्रं (अस्ति)। सत्कारायतनं, कुलस्य महिमा, रत्नैः विना भूषणम् (अस्ति)। तस्मात् अन्यं सर्वविषयम् उपेक्ष्य विद्याधिकारं कुरु।

**सरलार्थ** - विद्या मनुष्य की अपार प्रसिद्धि (कीर्ति) है, बुरे समय में (अच्छे दिन बीत जाने पर) सहारा है, इच्छाओं की पूर्ति करने वाली कामधेनु गाय है, वियोग में प्रेम है और वह मनुष्य की तीसरी आँख है। सम्मान का निवास स्थान (घर) है, कुल की महिमा है, बिना रत्नों का आभूषण है। इसलिए अन्य सब विषयों को छोड़कर विद्या पर अधिकार करो। अर्थात् विद्या पाने की कोशिश कीजिए।

Scanned with CamScanner

# शब्दार्थाः

| | | | |
|---|---|---|---|
| चौरहार्यम् | - | चोरों के द्वारा चुराने योग्य | to be stolen by a thief |
| राजहार्यम् | - | राजा के द्वारा छीनने योग्य | to be attacked by a king |
| भ्रातृभाज्यम् | - | भाइयों के द्वारा बाँटने योग्य | to be divided among brothers |
| भारकारि | - | भार बढ़ाने वाली | burden |
| प्रच्छन्नगुप्तम् | - | अत्यन्त गुप्त | hidden |
| भोगकरी | - | भोग का साधन उपलब्ध कराने वाली | giving objects of pleasure |
| परा | - | सबसे बड़ी | the greatest |
| राजसु | - | राजाओं में | among kings |
| केयूराः | - | बाजूबन्द | bracelets |
| चन्द्रोज्ज्वला (चन्द्र+उज्ज्वला) | - | चन्द्रमा के समान चमकदार | as bright as the moon |
| विलेपनम् | - | शरीर पर लेप करने योग्य सुगन्धित-द्रव्य (चन्दन, केसर आदि) | anointing |
| नालङ्कृता (न+अलङ्कृता) | - | नहीं सजाया हुआ | undecorated |
| मूर्धजाः | - | वेणी, चोटी | plait (hair) |
| वाण्येका (वाणी+एका) | - | एकमात्र वाणी | speech alone |
| समलङ्करोति | - | अच्छी तरह सुशोभित करती है | decorates |
| संस्कृता | - | संस्कारयुक्त (परिष्कृत) | well cultured |
| धार्यते | - | धारण की जाती है | is borne |
| क्षीयन्तेऽखिलभूषणानि (क्षीयन्ते+अखिलभूषणानि | - | सम्पूर्ण आभूषण नष्ट हो जाते हैं | all ornaments perish |
| भाग्यक्षये | - | अच्छे दिन बीत जाने पर | when good days end |
| आश्रयः | - | सहारा | helper |
| कामदुघा | - | इच्छानुसार फल देने वाली | yielding all desired objects |
| सत्कारायतनम् | - | सम्मान का केन्द्र या समूह | storehouse of respects |
| रत्नैर्विना | - | रत्नों से रहित | without jewells |
| विद्याधिकारम् | - | विद्या पर अधिकार | mastery over learning |
| तस्मादन्यमुपेक्ष्य (तस्मात्+अन्यम्+उपेक्ष्य) | - | अतः दूसरे सबको छोड़कर | therefore giving up others |

Scanned with CamScanner




**1. उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-**

(क) विद्या राजसु पूज्यते। — आम्

(ख) वाग्भूषणं भूषणं न। — न

(ग) विद्याधनं सर्वधनेषु प्रधानम्। — आम्

(घ) विदेशगमने विद्या बन्धुजनः न भवति। — न

(ङ) सर्वं विहाय विद्याधिकारं कुरु। — आम्

**2. अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनञ्च लिखत-**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | पुल्लिंगम् | षष्ठी | एकवचनम् |
| गुरूणाम् | पुल्लिंगम् | षष्ठी | बहुवचनम् |
| केयूराः | पुल्लिंगम् | प्रथमा | बहुवचनम् |
| कीर्तिम् | स्त्रीलिंगम् | द्वितीया | एकवचनम् |
| भूषणानि | नपुंसकलिंगम् | प्रथमा | बहुवचनम् |

**3. श्लोकांशान् योजयत-**

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | हारा न चन्द्रोज्ज्वलाः। |
| केयूराः न विभूषयन्ति पुरुषम् | न भ्रातृभाज्यं न च भारकारि। |
| न चौरहार्यं न च राजहार्यम् | या संस्कृता धार्यते। |
| सत्कारायतनं कुलस्य महिमा | विद्या-विहीनः पशुः। |
| वाण्येका समलङ्करोति पुरुषम् | रत्नैर्विना भूषणम्। |

| | |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | विद्या-विहीनः पशुः। |
| केयूराः न विभूषयन्ति पुरुषम् | हारा न चन्द्रोज्ज्वलाः। |
| न चौरहार्यम् न च राजहार्यम् | न भ्रातभाज्यं न च भारकारि। |
| सत्कारायतनं कुलस्य महिमा | रत्नैर्विना भूषणम्। |
| वाण्येका समलंकरोति पुरुषम् | या संस्कृता धार्यते। |

Scanned with CamScanner

**4. एकपदेन प्रश्नानाम् उत्तराणि लिखत-**

(क) कः पशुः? — विद्याविहीनः

(ख) का भोगकरी? — विद्या

(ग) के पुरुषं न विभूषयन्ति? — केयूराः

(घ) का एका पुरुषं समलङ्करोति? — वाणी

(ङ) कानि क्षीयन्ते? — भूषणानि

**5. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-**

(क) विद्याविहीनः नरः पशुः अस्ति।
विद्याविहीनः कः पशुः अस्ति?

(ख) विद्या राजसु पूज्यते।
का राजसु पूज्यते?

(ग) चन्द्रोज्ज्वलाः हाराः पुरुषं न अलङ्कुर्वन्ति।
चन्द्रोज्ज्वलाः के पुरुषं न अलंकुर्वन्ति?

(घ) पिता हिते नियुङ्क्ते।
कः हिते नियुङ्क्ते?

(ङ) विद्याधनं सर्वप्रधानं धनमस्ति।
विद्याधनं कीदृशं धनमस्ति?

(च) विद्या दिक्षु कीर्तिं तनोति।
विद्या कुत्र कीर्तिम् तनोति?

Knowledge Gallery

Scanned with CamScanner

6. **पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत-**

(क) गुरूणां गुरुः का अस्ति?

उ. गुरूणां गुरुः विद्या अस्ति।

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

उ. संस्कृता वाणी पुरुषं समलङ्करोति।

(ग) व्यये कृते किं वर्धते?

उ. व्यये कृते विद्याधनं वर्धते।

(घ) भाग्यक्षये आश्रयः कः?

उ. भाग्यक्षये आश्रयः विद्या।

7. **मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत-**

विद्या धनम् संस्कृता सततम् कुसुमम् मूर्धजाः पशुः गुरुः रतिः

| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| यथा- | हाराः | अलङ्कृता | भूषणम् |
| | मूर्धजाः | विद्या | धनम् |
| | पशुः | संस्कृता | सततम् |
| | गुरुः | रतिः | कुसुमम् |

Scanned with CamScanner